दक्षः कुक्कुटः तस्याण्डस्य त्वक्। शिला मनःशिला। इति भावप्रकाशः॥

लेखनः, पुं, (लिख + ल्युः।) शाणः। इति राजनिर्घण्टः॥

लेखनिकः, पुं, (लेखनं शिल्पमस्य। लेखन + ठन्।) लेखहारकः। परहस्तेन लेखकः। स्वहस्तेन लेखकः। इति मेदिनी। के, २११॥

लेखनी, स्त्री, लिख्यतेऽनया। (लिख + ल्युट्। ङीप्।) लेखनसाधनवस्तु। तत्पर्य्यायः। वर्णतूलिका २। इति हारावली॥ वर्णतूली ३ कलमः ४ अक्षरतूलिका ५। इति जटाधरः॥ कराश्रयः ६ चित्रकः ७। इति शब्दरत्नावली॥ *॥ (यथा, महाभारते।१।१।७८।
"श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम्।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम्॥")
लेखनीकरणशुभाशुभं यथा,—
"वंशलब्ध्या लिखेद्यस्तु तस्य हानिर्भवेद्ध्रुवम्।
ताम्रलब्ध्या तु विभवो भवेन्न तत्क्षयो भवेत्॥
महालक्ष्मीर्भवेन्नित्यं सुवर्णस्य शलाकया।
इन्द्रनलस्य लब्ध्या वै मतिवृद्धिः प्रजायते॥
तथा ह्यग्निमयैर्देवि पुत्रपौत्रधनागमः।"
अग्निमयैश्चित्रकाष्ठमयैः।
"रैत्येन विपुला लक्ष्मीः कांस्येन मरणं भवेत्॥
अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन वाथवा।
चतुरङ्गुललब्ध्या वा यो लिखेत् पुस्तकं शुभे।
तत्तदक्षरसंख्यं तु लक्ष्याद्युर्याति वै दिने॥"
यथा रैत्येनेत्यादिवचने एकत्रैव विधिनिषेधौ तथात्राप्यष्टाङ्गुलदशाङ्गुलयोर्विधिः निषेधश्चतुरङ्गुले। इति योगिनीतन्त्रे तृतीयभागे ७ पटलः॥ (खटिका। तत्पर्य्यायो यथा,—
"खटिका कठिनी चापि लेखनी च निगद्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लेखनीयः, त्रि, लेख्यम्। लेखितव्यम्। इति लिखधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम्॥ (यथा, सुश्रुते।६।१८।
"लेखनो लेखनीयश्च रोपणीयश्च स त्रिधा॥")

लेखर्षभः, पुं, (लेखेषु देवेषु ऋषभः श्रेष्ठः। लेख ऋषभ इवेति वा।) इन्द्रः। इत्यमरः॥

लेखहारः, पुं, लेखं हरति इत्यर्थे अण्प्रत्ययेन निष्पन्नः। पत्रवाहकः। इति सिद्धान्तकौमुदी॥ (यथा, कथासरित्सागरे।५।६५।
"निगूढ़ं स नृपस्तत्र लेखहारं व्यसर्जयत्॥")

लेखहारकः, पुं, (लेखहार एव। स्वार्थे कन्।) पत्रवाहकः। (यथा, कथासरित्सागरे। १६। १६०।
"आह्वानाय स्वनगरे स्थितेनोच्छृङ्खलस्थितेः।
भ्रातुर्मन्त्रिवरस्येह प्रहितो लेखहारकः॥")

लेखा, स्त्री, (लिख्यते इति। लिख + बाहुलकात् अप्। टाप्।) लिपिः। पङ्क्तिः। इति मेदिनी। खे, ४॥

लेखार्हः, पुं, (लेखे अर्हः।) श्रीतालवृक्षः। इति राजनिर्घण्टः॥ लेखनयोग्ये, त्रि॥

लेखितं, त्रि, लेखयति यत्। कारितलिखितम्। इति णिजन्तलिखधातोः क्तप्रत्ययेन निष्पन्नम्॥

लेख्यं, त्रि, (लिख + ण्यत्।) लेखितव्यम् लेखनीयम्। इति लिखधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम्॥ *॥ व्यवहाराङ्गकक्रियापादाङ्गम्। यथा,—
"षाण्मासिकेऽपि समये भ्रान्तिः संजायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढ़ान्यतः पुरा॥
लेख्यन्तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा।
असाक्षिकं साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः॥
मृतास्तु साक्षिणो यत्र धनिकर्णिकलेखकाः।
तदप्यपार्थं करणन्ते ताधेः स्थिराश्रयात्॥
दर्शितं प्रतिकालञ्च पठितं श्रावितञ्च यत्।
लेख्यं सिध्यति सर्व्वत्र मृतेष्वपि च साक्षिषु॥"
इति व्यवहारतत्त्वे बृहस्पतिः॥
अपि च। साम्प्रतं लेख्यं निरूप्यते। तत्र लेख्यं द्विविधम्। शासनं जानपदञ्चेति। शासनं निरूपितम्। जानपदमभिधीयते। तच्च द्विविधम्। स्वहस्तकृतमन्यकृतञ्चेति। तत्र स्वहस्तकृतमसाक्षिकम्। अन्यकृतं ससाक्षिकम्। अनयोश्च देशाचारानुसारेण प्रामाण्यम्। यदाह नारदः।
"लेख्यन्तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं तथा।
असाक्षिमत् साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः॥"
इति॥
तत्रान्यकृतमाह।
"यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम्।
लेख्यन्तु साक्षिमत् कार्य्यन्तस्मिन् धनिकपूर्व्वकम्॥"
धनिकाधमर्णयोर्योऽर्थो हिरण्यादिः परस्परं स्वरुच्या इयता कालेनैतावद्देयमितीयती च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थितस्तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्वनिर्णयार्थं लेख्यम्। साक्षिमद्भुक्तलक्षणं साक्षियुक्तम्। धनिकः पूर्व्वो यस्मिन् तद्धनिकपूर्व्वकम्। धनिकनामलेखनपूर्व्वकमिति यावत् कार्य्यं कर्त्तव्यम्। उक्तलक्षणाः साक्षिणो वा कर्त्तव्याः।
"अग्रं तु यत् कृतं कार्य्यं सिद्ध्यर्थन्तस्य साक्षिणः।
प्रवर्त्तन्ते विवादेषु स्वकृतं वाप्यलेख्यकम्॥"
इति स्मरणात्॥
अपि च।
"समामासतदर्द्धाहर्नामजातिस्वगोत्रकैः।
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम्॥"
समा संवत्सरः। मासश्चैत्रादिस्तदर्द्धः पक्षः शुक्लः कृष्णो वा। अहस्तिथिः प्रतिपदादिः। नाम धनिकाधमर्णयोः। जातिर्ब्राह्मणादिः। स्वगोत्रं वाशिष्ठादिगोत्रमेतैः समादिभिश्चिह्नितम्। तथा सब्रह्मचारिकं बह्वृचादिशाखाप्रयुक्तं गुणनामबह्वृचः कठ इति। आत्मीयपितृनाम धनिकर्णिकपितृनाम। आदि ग्रहणाद्द्रव्यजातिसंख्याचारादेर्ग्रहणम्। एतैश्चिह्नितं लेख्यं कार्य्यमिति गतेन सम्बन्धः। किञ्च।
"समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्।
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्॥"
धनिकाधमर्णयोर्योऽर्थः स्वरुच्या व्यवस्थितस्तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नामात्मीयं स्वहस्तेनास्मिंल्लेख्ये यदुपरि लेखितं तन्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत् पत्रे लिखेत्। तथा;—
"साक्षिणश्च स्वहस्तेन पितृनामकपूर्व्वकम्।
अत्राहममुकः साक्षी लिखेयुरिति ते समाः॥"
तस्मिन् लेख्ये ये साक्षिणो लिखितास्तेऽप्यात्मीयपितृनामलेखनपूर्व्वकमस्मिन्नर्थे अहममुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुस्ते च समाः संख्यातो गुणतश्च कर्त्तव्याः। यद्यधमर्णः साक्षी वा लिपिज्ञो न भवति तदाधमर्णोऽन्येन साक्षी च साक्ष्यन्तरेण सर्व्वसाक्षिसन्निधौ स्वमतं लेखयेत्। यथाह नारदः।
"अलिपिज्ञ ऋणी यः स्यात् स्वमतन्तु स लेखयेत्।
साक्षी वा साक्षिणान्येन सर्व्वसाक्षिसमीपतः॥"
इति।
अपि च।
"उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्॥"
ततो लेखको धनिकाधमर्णिकाभ्यामुभाभ्यां प्रार्थितेन मयामुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेख्यं लिखितमित्यन्ते लिखेत्॥ *॥ साम्प्रतं स्वकृतलेख्यमाह।
"विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितन्तु यत्।
तत् प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते॥"
यल्लेख्यं स्वहस्तेन लिखितं अधमर्णेन तत् साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः। बलोपधिकृतादृते। बलेन बलात्कारेण। उपधिना छललोभक्रोधभयमदादिलक्षणेन यत् कृतं तस्माद्विना। नारदोऽप्याह।
"मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतन्तथेति॥"
तच्चैतत् स्वहस्तकृतं परहस्तकृतञ्च यल्लेख्यं देशाचारानुसारेण सन्धकव्यवहारे बन्धकव्यवहारयुक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमित्येतावन्न पुनः साधुशब्दैरेव प्रातिस्विकदेशभाषयापि लेखनीयम्। यथाह नारदः।
"देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम्।
तत् प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम्॥"
इति॥
विधानं विधिराधेर्विधिराधीकरणमस्य लक्षणम्। गोप्याधिर्भोग्याधिः कालकृतमित्यादि तद्व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्ताधिविधिलक्षणम्। अविलुप्तक्रमाक्षरं यथाक्रमः क्रमश्चाक्षराणि च क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिंस्तदविलुप्तक्रमाक्षरम्। तदेवं भूतं लिखितं प्रमाणम्। राजशासनवन्न साधुशब्दनियमोऽत्राभिप्रायः। लेख्यप्रसङ्गेन लेख्यारूढ़मप्यर्थं त्रिभिरेव